**दिनाङ्क :-17.10.2025**

**प्रातः - 06:55**

**प्रधानमन्त्री-आन्ध्राप्रदेशे**

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः आन्ध्रप्रदेशस्य कुर्नूल-नगरे प्रायः सार्ध-चतुश्शतोत्तर-त्रयोदशसहस्र-कोटिरूप्यकाणां बहुविधविकासयोजनानां उद्घाटनम्, शिलान्यासञ्च कृत्वा परियोजनाः राष्ट्रार्पिताः। एते प्रकल्पाः उद्योगक्षेत्रेषु, विद्युत्-प्रेषणक्षेत्रेषु, मार्गेषु, रेलमार्गेषु, रक्षा-निर्माणक्षेत्रेषु, पेट्रोलियम-प्राकृतिक-इंधन इत्येतेषु च क्षेत्रेषु विस्तृताः सन्ति, येन क्षेत्रीयसंरचनायाः वर्धनार्थं, औद्योगिकीकरणस्य गतिं वर्धयितुं, राज्ये सर्वसमावेशक-सामाजिक-आर्थिकवृद्ध्यै च सर्वकारस्य प्रतिबद्धतां प्रदर्शयति। अस्मिन् अवसरे जनसमूहं सम्बोधयन् प्रधानमन्त्री अवदत् यत् आन्ध्रप्रदेशः द्रुतगत्या विकासस्य मार्गे अग्रे गम्यमानोऽस्तीति। स्वच्छ-ऊर्जायाः विद्युदुत्पादनस्य च क्षेत्रे भारतस्य द्रुतगत्या प्रगतिं प्रधानमन्त्रिणा अधोरेखितम्। आन्ध्रप्रदेशस्य प्रौद्योगिकीय-विकासे प्रवदन्, श्रीमोदी कुर्नूल्-नगरं भारतस्य ड्रोन-हब्-इति रूपेण प्रतिष्ठापयितुं राज्यस्य प्रयत्नान् प्रशंसितवान्। विशाखापत्तनम्-नगरं राष्ट्रस्य प्रथमं कृत्रिम-बुद्धि-सम्पर्क-केन्द्रम् इति भवितुं प्रधानमन्त्रिणा स्वदूरदृष्टिं प्रकाशितम्।

**बिहार विधानसभा निर्वाचनस्य**

बिहारविधानसभानिर्वाचनस्य प्रथम-चरणाय नामाङ्कनस्य अद्य अन्तिमतिथिः अस्ति। आहत्य त्रिचत्वारिंशदधिक द्विशतासनेषु एकविंशत्यधिकैकशत आसनानां कृते अस्मिन् चरणे नवम्बर षट्दिनाङ्के मतदानं भविष्यति। प्रथमे चरणे पटना, दरभङ्गा, मुज़फ़्फ़रपुर, गोपालगञ्ज्, भोजपुर मण्डलानि च समाविष्टानि सन्ति। श्वः नामाङ्कनपत्राणां परीक्षणं भविष्यति तथा च नामाङ्कनपत्राणां प्रत्यावर्तनस्य अन्तिमतिथिः अक्टोबर मासस्यैव विंशति दिनाङ्कः अस्ति। द्वितीय चरणस्य मतदानं नवम्बरमासस्य एकादश दिनाङ्के भविष्यति, मतगणना च नवम्बरमासस्य चतुर्दश दिनाङ्के भविष्यति।

**गुजरातः-भूपेन्द्रपटेलः**

मुख्यमंत्रिणः भूपेंद्र-पटेलस्य मन्त्रिमण्डले नवनिर्वाचिताः मन्त्रिणः अद्य शपथवचनानि स्वीकरिष्यन्ति । शपथ-ग्रहण-समारोहः गांधीनगरस्य महात्म-मंदिरे राज्यपालस्य आचार्यः देवव्रतः इत्यस्य उपस्थितौ भविष्यति । राज्यपालः राज्य-मन्त्रिमण्डलस्य विस्तारे सम्मिलितेभ्यः मन्त्रिभ्यः पदस्य गोपनीयतायाः च शपथवचनानि दास्यति ।

**राष्ट्रपतिः आदिकर्मयोगी**

राष्ट्रपतिः द्रौपदी मुर्मु अद्य नवदिल्ल्याम् आदिकर्मयोगी अभियानस्य विषये आयोजिते राष्ट्रियसम्मेलने भागं ग्रहीष्यति। सम्मेलनस्य केन्द्रबिन्दुः त्रिंशोत्तर द्विसहस्रतम वर्षस्य जनजातीयग्रामदृष्टिः विचारात् कार्यान्वयने इति भविष्यति। आयोजनस्य प्रमुखं आकर्षणं त्रिंशोत्तर द्विसहस्रतम वर्षस्य जनजातीय-ग्राम-परिकल्पना भविष्यति।

**जयशङ्करः-श्रीलङ्का**

विदेश-मंत्री डॉ. एस्-जयशंकरः ह्यः नवदिल्ल्यां श्रीलंकायाः प्रधानमंत्रिणा डॉ. हरिनी-अमरसूर्या इत्यनया सह मेलनम् अकरोत् । एकस्मिन् समाजिक-संदेशे , डॉ. जयशंकरः अकथयत् यत् सः श्रीलंकायै भारतस्य समर्थनं , शिक्षा-निर्माण-क्षेत्रयोः परस्परसहयोगं च विधातुं चर्चाम् अकरोत् ।

**ऋतु-विभागः**

भारत-ऋतु-विभागेन अद्य केरल-माहे-लक्षद्वीप्-तमिल्नाडु-पुदुचेरी-करैकल्-प्रदेशेषु अति वृष्टेः नारङ्ग-वर्णीय सञ्चेतना प्रदत्ता अस्ति। विभागेन आन्ध्रप्रदेशे, तटीय-कर्णाटके, दक्षिणान्तरिक-कर्णाटके च प्रचण्डवृष्टेः पूर्वानुमानं प्रकटितम् अस्ति।

**संस्कृत - साप्ताहिकी**

प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः ए□एम.गोल्ड-प्रवाहिकातः रविवासरे मध्याह्ने सार्धैक- वादनेतः भविष्यति भवन्तः सर्वे श्रोतुं प्रभवन्ति।